# संस्कृतवाङ्मये नगररचना

प्रज्ञा करकरे, प्रो. पराग जोशी

उपोद्घातः -

भारतीयस्थापत्यकलायाः शिल्पशास्त्रस्य च परम्परा गौरवशालिनी वर्तते । वास्तुशास्त्रस्य अष्टादशानाम् उपदेशकानां परम्परा आसीत् इति मत्स्यपुराणे उल्लिखितमस्ति ।

यथा -

भृगुरत्रिर्वसिष्ठश्च विश्वकर्मा मयस्तथा ।
नारदो नग्नजिच्चैव विशालाक्षः पुरंदरः ॥
ब्रह्मा कुमारो नन्दीशः शौनको गर्ग एव च ।
वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पतिः ॥
अष्टादशैते विख्याता वास्तुशास्त्रोपदेशकाः ॥ [१]

वेदेषु उपवेदेषु च ग्राम-नगररचनाशास्त्रविषयस्य वर्णनम् उपलभ्यते । अस्य विस्तारः देशकालपरिस्थित्यनुसारं स्वावश्यकतानुकूलं क्रियते स्म । लघुग्रामतः बृहन्नगरस्य निर्माणसमये प्रकृतौ उपलब्धसंसाधनानामुपयोगं कृत्वा ग्राम-नगरादि प्रतिष्ठापनं निर्माणं वा क्रियते स्म ।

चतुर्षु उपवेदेषु शिल्पवेदः अथर्ववेदस्य उपवेदः इति । ग्राम-नगररचनाशास्त्रस्य विस्तारपूर्वकं वर्णनं शिल्पवेदे प्राप्यते । अस्य महत्त्वपूर्णः ग्रन्थः "भृगुशिल्पसंहिता"। महर्षिभृगुणा शिल्पसंहिता त्रिषु खण्डेषु विभक्ता । धातुखण्डः, साधनखण्डः, वास्तुखण्डः इति । त्रिष्वपि खण्डेषु दश शिल्पशास्त्रं, द्वात्रिंशत् शिल्पविद्याः, चतुःषष्टिः शिल्पकलाः एतेषाम् अन्तर्भावः वर्तते । अत्र वास्तुखण्डे ग्राम-नगर-रचना-शास्त्रस्य विस्तृतं विवेचनं प्रतिपादितमस्ति।

नगररचनाशास्त्रस्य ग्रन्थपरम्परा विस्तृता वर्तते । यथा- भृगुशिल्पसंहिता, वास्तुविद्या, मनुष्यालयचन्द्रिका, मयमतम्, शिल्परत्नम्, समराङ्गणसूत्रधारः, विश्वकर्मप्रकाशः, शुक्रनीतिः, अपराजितपृच्छा, राजवल्लभम्,

विश्वकर्मन्वायप्रदीपिका, बृहत्संहिता, वास्तुमञ्जरी, मानसारः इति ।

"नगरम्" शब्दस्यार्थः "न गरं, विषं यत्र तत् नगरम्" नाम यत्र दुःखं कष्टं नास्ति तन्नगरम् । यदि मनुष्येण राज्ञा वा वास्तुशास्त्रज्ञानां मार्गदर्शनं स्वीकृत्य नगरनिर्मितिः भवननिर्मितिः च क्रियते तर्हि तन्नगरे भवने वा कोऽपि विघ्नं दुःखं नायाति । अतः नगर-भवनस्य स्थापना शास्त्राधारेणैव कर्तव्या इति सम्प्रदायः यतोहि नगरं भवनं वा दोषरहितं भवेत् ।

नगरशास्त्रस्योद्गमः वेदात् भवति एवं सन्दर्भाः वेदेषु उपलभ्यन्ते । वेदस्यानन्तरं पुराणे, संस्कृतसाहित्ये तथैव नगररचनाशास्त्रे एते विषयाः चर्चिताः ।

## वेदेषु नगररचना

वैदिकवाङ्मये चत्वारः वेदाः, षड् वेदाङ्गानि तथा आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, शिल्पवेदः एते उपवेदाः अन्तर्भूताः। मानवानाम् आध्यात्मिकविकासस्य तथा भौतिकविकासस्य सन्दर्भे सर्वाः विद्याः एतेषु ग्रन्थेषु उपलभ्यन्ते । भौतिकविकासे मुख्यत्वे अन्नं, वस्त्रम्, आवासः मानवस्य कृते अनिवार्यं वर्तते । अतः मानवेन नगररचनायाः रचना कृता तथा एकस्याः सुदृढ-व्यवस्थायाः निर्माणं कृतम् । ग्रामरचनायाः विषये नैके शास्त्रसन्दर्भाः वेदे, उपवेदे च दृश्यन्ते । यस्य विस्तारः मानवेन देशकालपरिस्थित्यनुसारेण कृतः। ग्रामतः नगरपर्यंतं मानवेन प्राकृतिकसंसाधनानाम् उपयोगं कृत्वा प्रगतिः साधिता ।

वैदिकवाङ्मये गृहनिर्माणस्य आरम्भः अस्थायी आवासतः दीर्घं महाप्रासादपर्यन्तं दृश्यते । मानवेन सामाजिकव्यवस्थायै मूर्तस्वरूपं दातुं स्थायी-अस्थायी निवासः, मठम्, कुटी, राजप्रासादः एतेषां निर्माणं कृतम् । अनन्तरं स्थूलरूपेण ग्राम-नगरस्य विस्तारः कृतः। भृगुसंहितायां वास्तुखण्डे वेश्मः, प्राकारः, ग्राम-नगररचनाशास्त्रविषये शिल्पविद्यायाः विस्तारः प्राप्यते परं यस्य मूलभूतः सिद्धान्तः वेदेषु प्राप्यते। "क्षेत्रासा" [२], "क्षेत्रजेश्" [३] एवं प्रकारेण शब्दाः प्राप्यन्ते। वरुणदेवस्य राजप्रासादस्य वर्णनं विशालभवनरूपेण दृश्यते तथैव मित्रदेवस्य राजप्रासादसन्दर्भे सहस्त्रस्थाणूनां वर्णनं प्राप्यते।

"सहस्त्रस्थूण आसाते।" [४]

तदनुसारेण ऋग्वेदे त्रिधातुः इति शब्दप्रयोगः वर्तते यस्य अर्थः त्रितलम् अस्ति । त्रिधातुः भवनस्य विशेषता अस्ति यत् एतत् भवनं भद्रं, अनातुरं, रोगरहितं वर्तते।

यद् भद्रं यदानुतरं त्रिधातुः यद् वरुथ्यम्। [५]

लोहेन निर्मितः दुर्गः अजेयः वर्तते। ऋग्वेदे तथा अथर्ववेदे लोहेन निर्मितानां नगराणां दुर्गाणाञ्च वर्णनं प्राप्यते ।

पुरः कृणुध्वम् आयसीरधृष्टाः। [६]

तथैव ऋग्वेदे समुद्रतीरेऽपि भवननिर्माणस्य वर्णनं लभ्यते।

आयने ते परायणे दूर्वा रोहन्तु पुष्पिणीः।
ह्रदाश्च पुण्डरिकाणि समुद्रस्य गृहे इमे॥ [७]

अथर्ववेदे शालानिर्माणसूक्तं महत्त्वपूर्णं वर्तते। यस्य ऋषिः ब्रह्मा तथा देवता स्वयं शाला (वास्तोष्पतिः) च। या वास्तु-भवननिर्माणविद्यायाः अधिष्ठातृदेवता इति। अस्मिन् सूक्ते भवननिर्माणं, निर्वाहसाधनं तथा तस्य उपयोगस्य उल्लेखः दृश्यते। अस्य सूक्तस्य मन्त्राः भवनस्य शिलान्याससमये प्रयुक्ताः सन्ति ।

इहैव ध्रुवां निमिनोमि शालां क्षेमे तिष्ठाति धृतमुक्षमाणा
तां त्वा शाले सर्ववीराः सुवीरा अरिष्टवीरा उप सं चरेम॥ [८]

एवं प्रकारेण वेदेषु उपवेदेषु शिल्पशास्त्रसन्दर्भाः परिलक्ष्यन्ते ।

पुराणेषु नगररचना :-

पुराणं नाम भारतीया संस्कृतिरिति । मनुष्याणां विकासक्रमः, व्यवहारः, आचरणानि यस्मिन् शास्त्रे उपलभ्यन्ते तच्छास्त्रं पुराणमित्युच्यते। यतोहि पुराणे समाजस्य कल्याणार्थं सर्वाः विद्याः निरूपिताः। वास्तुशास्त्रस्य वर्णनमपि पुराणे प्राप्यते। पुराणेषु बहुषु स्थानेषु नगररचनायाः सविस्तरं विवेचनं लभ्यते। अग्निपुराणे नगरनिर्माणं, नगरविस्तारस्य विवेचनम् उपनिबद्धं वर्तते। अग्निपुराणे

नगरस्थापना चतुर्षु तत्त्वेषु विभज्यते । यथा स्थानचयनम्, भूमिपरीक्षणम्, विहितकालज्ञानम्, देवार्चनमिति। नगररचनायाः ज्ञानेन राज्यस्य अभिवृद्धिः भवति । नगरं कथं भवेत्, का भूमिः ग्राह्या, नगरनिर्माणाय एकयोजना अर्धयोजना वा भूमिः आवश्यकी, निवासः कुत्र करणीयः, छिन्नं-भग्नं अर्धचन्द्राकारः न भवेत्। एकं द्वे त्रीणि वा द्वारयुक्तं धनुषाकारं वज्रनागाभं नगरं शान्तिप्रदं भवति।
यथा -

नगरादिकवास्तुं च वक्ष्ये राज्यादिवृद्धये।
योजनं योजनार्द्धं वा तदर्थं स्थानमाश्रयेत्॥
अभ्यर्च्य वास्तुनगरं प्राकाराढ्यं तु कारयेत्।
ईशादि त्रिंशत्पदके पूर्वद्वारं च सूर्यके॥
गन्धर्वाभ्यां दक्षिणे स्याद्वारुण्ये पश्चिमे तथा।
सौम्यद्वारं सोम्यपदे कार्या हट्टास्तु विस्तराः॥
येनेभादिसुखं गच्छेत्कुर्याद् द्वारं तु षड्करम्।
छिन्नकर्णं विभिन्नं च चन्द्रार्धाभं पुरं न हि॥
वज्रसूचीमुखं नेष्टं सकृद् द्वित्रिसमागमम् ।
चापाभं वज्रनागाभं पुरारम्भे हि शान्तिकृत् ॥ [९]

तथैव भविष्योत्तरपुराणेऽपि नगररचनासन्दर्भाः दृश्यन्ते। भविष्योत्तरपुराणे नगरस्य चत्वारः भेदाः वर्णिताः - दीर्घम्, चतुरस्त्रम्, त्र्यस्त्रम्, वर्तुलम् ।

दीर्घं वा चतुरस्त्रं वा नगरं कारयेन्नृपः।
त्र्यस्त्रं वर्तुलं वापि कदाचिदपि कारयेत्॥ [१०]

गरुडपुराणेऽपि वास्तुशास्त्रस्य, नगररचनायाः विषयाः चर्चिताः। अस्मिन् पुराणे अस्य शास्त्रस्य अध्यायद्वयं प्राप्यते।

वास्तुं संक्षेपतो वक्ष्ये गृहादौ विघ्ननाशनम् ।
ईशानकोणादारभ्य ह्येकाशीतिपदे यजेत् ॥
ईशाने च शिरः पादौ नैरृतेऽग्न्यनिले करौ ।

आवासवासवेश्मादौ पुरे ग्रामे वणिक्पथे ॥
प्रासादारामदुर्गेषु देवालयमठेषु च ।
द्वाविंशत्तु सुरान्बाह्ये तदन्तश्च त्रयोदश ॥
ईशश्चैव पर्जन्यो जयन्तः कुलिशायुधः ।
सूर्य्यः सत्यो भृगुश्चैव आकाशो वायुरेव च ।।
पूषा च वितथश्चैव ग्रहक्षेत्रयमावुभौ ।
गन्धर्वो भृगुराजस्तु मृगः पितृगणस्तथा ॥ [११]

संस्कृतसाहित्ये नगररचना -

भवननिर्माणार्थम् अथवा नगरनिर्माणार्थं वास्तुशास्त्रस्य ज्ञानमावश्यकं वर्तते। दिग्दृष्ट्या भवने प्रकोष्ठाणां स्थापना क्रियते चेत् तस्यां दिशि ताः देवताः प्रसन्नतया निवासं कुर्वन्ति। तथैव तासां देवतानां यत् कार्यं वर्तते तत् ताः शुभं कुर्वन्ति तथा सुखमपि ददति। अतः सर्वासु दिक्षु ताः देवताः स्वोचितं संस्थाप्यन्ते चेत् तेषां नगराणां समृद्धिः अभिवर्धते । अतः दिशमनुसृत्य भवन-नगरस्य निर्माणं करणीयम् इति । यतोहि क्षेत्रस्य प्रभावः तादृशः भवति इति शास्त्रम् । भवने स्वभावतः प्रसन्नता भवति चेत् कदापि कुत्रचित् क्रोधः प्रस्फुरितः भवति तदा एतत् किमर्थं प्रसन्नता नष्टा इत्ययं प्रश्नः मनसि आयाति । वस्तुतः गृहशान्त्ये अशान्त्ये वा प्रतिक्षणम् अन्तस्थाः स्थितिरेव कारणमस्ति इति न किन्तु बहुधा वातवरणस्थानदेशकालादीनि कारणीभूतानि भवन्ति ।

एतस्य उत्तमम् उदाहरणं रामायणे प्राप्यते । रामायणे दशरथराजस्य राजप्रासादे कोपभवनमासीदिति उल्लेखः दृश्यते । अर्थात् राजप्रासादे कोपभवनं नामकम् एकं भवनम् आसीत् । कोपभवने केनापि प्रवेशः क्रियते चेत् सः क्रुद्धः भवति स्म इति ज्ञानं लभ्यते । एतद् विहाय एकमन्यदुत्तममुदाहरणं वर्तते अयं प्रसङ्गः। श्रीरामः, लक्ष्मणः एतेषां वनवाससमये एकदा लक्ष्मणः कुत्रचित् स्थाने अत्यन्तं क्रुद्धः जातः। तस्य क्रोधः श्रीरामस्योपरि अवर्तत । लक्ष्मणः स्वस्य क्रोधनिवारणार्थं प्रयत्नं कुर्वन्नासीत् परं सः असमर्थः। श्रीरामः सर्वं ज्ञातवान् परं लक्ष्मणः यदा व्याकुलः जातः तदा सः तमाहूतवान् । लक्ष्मणः श्रीरामस्य समीपे गत्वा शान्तः जातः तदा सः

पृष्टवान् अहं तत्र स्थित्वा क्रुद्धः आसम् परं भवतः समीपे शान्तः अभवम् । तत्र स्थित्वाऽपि भवतः सान्निध्यं मया प्राप्तं परं तत्र अहं किमर्थमुद्विग्नः जातः? इत्यनया शङ्कया पीडितोऽस्मि' लक्ष्मणस्य एतद् वचनं श्रुत्वा श्रीरामेण उक्तम् - तस्मिन् स्थाने सुन्दोपसुन्द नामक भ्रात्रोः कलहः जातः "

एतेन प्रसङ्गेन ज्ञायते यत् क्वचित् स्थाने या घटना घटिता तस्याः संस्कारः तस्मिन् स्थाने वा तस्यां भूमौ भवति । अतः स्वभावतः कस्मिंश्चित् स्थाने यदि मनुष्यः सुखदुःखक्रोधादि भावनानाम् अनुभवं करोति तर्हि तस्य अनुभवस्य कारणम् आभ्यन्तरस्थितिरेव वर्तते इति न अपि तु तस्मिन् स्थाने यद् घटितं तैः संस्कारैः अपि भवति । अतः नगररचनाशास्त्रानुसारेणैव स्थानपरीक्षणं, स्थानचयनम् अवश्यं करणीयम् ।

नगररचनाशास्त्रे कस्यापि नगरस्य केवलं भौगोलिकस्थितेः भव्यता परिकल्प्यते इति न किन्तु तेषु नगरेषु दिव्यतायाः वासः भवेत् अनया दृष्ट्या नगरस्य स्थापना करणीया इत्युल्लिखितमस्ति । नगरे निवसन्तः जनाः यदि धार्मिकाः, स्वकर्मणि निरताः, जितेन्द्रियाः, दानशीलाः, अध्ययनशीलाः, सत्यवादिनः, कृतज्ञाः सन्ति तर्हि नगरे दिव्यता प्राप्यते।

वाल्मीकिरामायणे अयोध्यायाः भव्यताविषये अधोलिखिताः सन्दर्भाः उपलभ्यन्ते ।

रम्यचत्वरसंस्थानां संविभक्तमहापथाम्।
हर्म्यप्रासादसम्पन्नां गणिकावरशोभिताम्।
रथाश्वगजसम्बद्धां तूर्यानादनिनादिताम्।
सर्वकल्याणसम्पूर्णां हृष्टपुष्टजनाकुलाम्॥
आरामोद्यानसम्पन्नां समाजोत्सवशालिनीम्।
सुखिता विचरिष्यन्ति राजधानीं पितुर्मम॥ [१२]

ग्राम-नगररचनाशास्त्रे नगररचना -

वास्तुशास्त्रं सर्वव्यापकं विज्ञानं वर्तते । वास्तुशास्त्रस्य दृष्टिः सामाजिकी, लोककल्याणाय प्रवर्तते । मनुष्यजीवने वृक्षाः, पशवः एतेषामत्यन्तं महत्त्वम् अस्ति। अतः भूमौ वनस्पतीनां विकासः जातः चेत् बहवः वृक्षाः, धार्मिकस्थलानि, नद्यः

उत्तमप्रकारेण कृषिः भवितुमर्हति । नगरे गृहनिर्माणार्थं योग्यवस्तूनि यत्र प्राप्येरन् तत्स्थाने नगरनिर्माणं करणीयम् ।

समराङ्गणसूत्रधारग्रन्थे नगरस्य कृते अधोलिखिताः शब्दाः प्राप्यन्ते।

नगरम्, मन्दिरम्, दुर्गम्, पुष्करम्, निवासः, सदनम्, सद्म, क्षयः, क्षितिलयः इ.

एवं प्रकारेण राजा यस्मिन् नगरे निवसति तद् नगरं नाम "राजधानी" इति उच्यते । अपरं नगरं शाखानगरमिति भणितम्।

नगरं मन्दिरं दुर्गं पुष्करं साम्परायिकम्।
निवासः सदनं सद्म क्षयः क्षितिलयस्तथा॥
यत्रास्ते नगरे राजा राजधानीं तु तां विदुः।
शाखानगरसञ्ज्ञानि ततोऽन्यानि प्रचक्षते॥ [१३]

समराङ्गणसूत्रानुसारेण नगरस्य प्रकारत्रयं वर्तते। "पुरस्य त्रिविधस्यापि"[१४] ज्येष्ठनगरम्, मध्यमनगरम्, कनिष्ठनगरम् इति प्रकारत्रयमपि मानप्रमाणाधारितम्।

ज्येष्ठं तत्र चतुश्चापसहस्रं पुरमिष्यते।
मध्यं द्वाभ्यां सहस्राभ्यामेकेन व्यासतोऽधमम्॥
साष्टमांशं सपादं वा सार्धं वा व्यासमायतम्।
कुर्यादेकैकमायामं चतुरास्त्रीकृतं शुभम्॥ [१५]

ज्येष्ठनगरस्य प्रमाणं ४000 चापमुक्तमस्ति । तथैव निर्दिष्टव्यासस्य अष्टमः भागः विस्ताररूपेण कल्पितः। मध्यमनगरस्य प्रमाणं २000 चापं स्यात्, तस्य विस्तारः चतुर्थः भागः गृहीतः। कनिष्ठनगरस्य प्रमाणं १000 चापं भवेत् तथैव तस्य विस्तारः अर्धभागः भवेत् । त्रयाणां नगराणामपि रचना चतुरस्त्रं भवेत् यतोहि सा शुभप्रदा इति।

तदनुसारेण नगरनिर्माणे मार्गाणां योजना, तेषां सन्निवेशः स्थापत्यकलायाः उत्तमं कौशलं वर्तते । मार्गविनिवेशस्य मुख्यमुद्दिष्टमस्ति यद् दिशानिर्णयानन्तरं नगरवासिनां आरोग्यवर्धनार्थं तदनुरुपेण नागरिकाणां भवनविन्यासं एवंप्रकारे स्यात् यत् प्रत्येकं भवनस्य प्रकोष्ठे सहजतया सूर्यरश्मिः, निर्मलवायुः एतैः प्रवेशः कर्तुं

शङ्कुयात्।

नगरे मार्गाणां सङ्ख्या कियती भवेत् एतस्मिन् विषये वास्तुशास्त्रस्य विद्वद्भिः नगराणां विस्तारः एतेषामुपरि आधारितः, प्रत्येकं नगरे भिन्ना-भिन्ना सङ्ख्या निर्धारिता । मयमतं ग्रन्थानुसारेण नगरे प्रधानतया मार्गाणां विन्यासः पूर्वतः पश्चिमदिशि भवेत् । एतेषां मार्गाणां सङ्ख्या द्वि, चत्वारि, अष्ट, दश, द्वादशपर्यन्तं समसङ्ख्या भवेत् अपि च अयं नियमः उत्तरतः दक्षिणदिक्पर्यन्तानां मार्गाणां कृते प्रतिपादितः। यदि विषमसङ्ख्यानुसारेण मार्गाणां नियोजनं क्रियते तर्हि त्रयः, पञ्च, सप्त, नव , एकादश क्रमेण नियोजनं भवितुं शक्यते किन्तु युग्मम् अथवा अयुग्मं पदक्रमानुसारेण ब्रह्मांशः द्वे त्रीणि वा भवेत् ।

प्राक्प्रत्यग्गतमार्गा द्वादश दशवाष्टषड्वतुर्युगलम्।
तावदुदीचीनास्ते तत्रैवायुग्मसङ्ख्या वा।।
एकादशनवसप्तकपञ्चगुणावैकमार्गा वा।
युग्मायुग्मपदेषु द्व्येक त्रिभिरंशकैरजांशाः स्युः॥ [१६]

मयमतम् ग्रन्थस्य "ग्रामविन्यासः" नामक नवमे अध्याये नगराणाम् अष्ट प्रकाराः वर्णिताः। दण्डकम्, स्वस्तिकम्, प्रस्तरम्, प्रकीर्णकम्, नन्द्यावर्तः, परागः, पद्मकम्, श्रीप्रतिष्ठितम् इति । अत्र अष्टप्रकारेषु प्रकारत्रयमेव सचित्रं दर्शयितुं प्रयते।

१) दण्डकम्-

प्रागुदगग्रं मार्गं ककनीकृतदण्डवत्तु तन्मध्ये ।
द्वारचतुष्टययुक्तं दण्डकमिति भण्यते मुनिभिः ॥
दण्डवदेका वीथी साप्येवं दण्डकं प्रोक्तम् ॥ [१७]

यस्मिन् नगरे यत्र मार्गः अवक्रः वर्तते नाम पूर्वतः उत्तरदिशि नियोजितः आसी तथा यदि परस्परभेदनं भवति तर्हि विदुषां मतेन तन्नगरं दण्डकमिति । अस्मिन्नगरे द्वाराणां सङ्ख्या चत्वारि वर्तते । एतद् विहाय सरलं दण्डानुरुपं यत्र वीथ्याः विन्यासः भवति चेत् तदपि दण्डकमिति ।




२) प्रस्तरम्-

प्राक्प्रत्यग्गतमार्गैस्त्रिभिरुदगग्रैस्त्रिभिश्चतुर्भिरथो ।
पञ्चभिरपि षड्भिःसप्तभिरपि युक्तं प्रस्तरं पञ्च ॥ [१८]

यत्र पूर्वतः पश्चिमदिशि मार्गत्रयं तथा उत्तरादारभ्य त्रीणि, चत्वारि, पञ्च, षट्, सप्त मार्गाः सन्ति तर्हि तन्नगरं प्रस्तरमित्युच्यते ।




३) स्वस्तिकम्-

नवपदयुक्ते ग्रामे परितो मार्गं पदस्य तस्य बहिः।
तस्मात् प्रागुदगग्रात् प्राग्वीथी दक्षिणाग्रा सा ॥

तस्मात् प्राग्दक्षिणतो दक्षिणवीथी प्रतीचिमुखा ।
तस्मादवागपरतः पश्चिमवीथ्यग्रमुत्तरतः ॥
अपरोत्तरतस्तरमादुत्तरवीथ्यां मुखं प्राच्याम् ।
एतत् स्वस्तिकमुदितं स्वस्त्याकृत्या चतुर्मार्गम् ॥ [१९]

अस्य नगरस्य रचना नवपदात्मकं वर्तते । नगरस्य बाह्यतः चतसृषु दिक्षु नगरस्य समान्तरः मार्गः वर्तते । अत्र एका वीथी पूर्वदिशि तथा च ईशान्य कोणादारभ्य दक्षिणदिक्पर्यन्तास्ति। इयं पूर्ववीथीति । द्वितीया वीथी आग्नेयकोणादारभ्य पश्चिम-नैऋत्य-कोणपर्यन्तं प्रतिगच्छति । अस्याः नाम दक्षिणवीथी । तृतीया वीथी नैऋत्य-कोणादारभ्य उत्तरदिशि कोणं नाम वायव्यं गच्छति । सा पश्चिमवीथीति । चतुर्थी वीथी वायव्यतः ईशानपर्यन्तं गच्छति अस्याः नाम उत्तरवीथीति विदितम्। एवं प्रकारेण चत्वारः समानाः मार्गाः वर्तन्ते चेत् स्वतिकाकारं भवति अतएव अस्य नगरस्य नाम स्वस्तिकनगरमिति ।




निष्कर्षः

ग्राम-नगररचनाशास्त्रं मनुष्याणां निवासस्थाने दिव्यत्वं, सुखं, शान्तिश्च कल्पयितुं प्रवृत्तं शास्त्रं वर्तते । अस्मिन् शास्त्रे ग्राम-नगर-भवननिर्माणाय विविधाः प्रकाराः, नियमाः, भूपरीक्षायाः वर्णनं कृतमस्ति । उपलब्धनैसर्गिकसंसाधनानाम् उपयोगं कृत्वा नगरनिर्माणं भवेद् इति शास्त्रस्यास्य सारः । धार्मिकनगरम्, राजकीयनगरम्, पर्यटननगरम्, व्यापारिनगरम् इत्यादयः नगरप्रकाराः अत्र उपलभ्यन्ते।

नगररचनाशास्त्रे दिग्देशकालानामपि महत्त्वं वर्तते। कस्यां दिशि किं स्यात् एतेषामपि नियमाः शास्त्रे प्राप्यन्ते। कालः नाम ऋतुः तथा अयनाद्यनुसारेण नगर-भवनस्य निर्मितिः भवेत्। यतोहि नगरनिर्मितिः ऋतूणां सर्वेक्षणं कृत्वा करणीयेति प्राचां वचः । अतः नगररचना दिग्देशकालानुगुणं भवेत्। अस्मिन् शास्त्रे नगरस्य आकारविषयस्य चर्चा दृश्यते यत्र वायोः प्रवाहार्थं गवाक्षव्यवस्था, वातानुकूलं व्यवस्था इत्यादि सङ्कल्पनाः चर्चिताः। नगरस्य आकारः लघुः भवेत् यतोहि गमनागमनं, प्रवासः, परिवहनं योग्यप्रकारेण सुकरं भवेदिति आशयः।

ग्राम-नगररचनाशास्त्रमिदं मानवकल्याणार्थं रचितं शास्त्रम् । अस्य शास्त्रस्याधारेण मनुष्येण यदि ग्राम-नगर-भवनस्य निर्मितिः क्रियते तर्हि तद् ग्राम-नगर-भवनं चिरकालपर्यन्तं शाश्वतं भवतीति ।

पञ्चमहाभूतैः व्याप्तेयं सृष्टिः यस्यां यत्पिण्डे तद् ब्रह्माण्डे इति नियमानुगुणं सर्वत्र एतेषां वासः सहभागश्च भवतीति तात्पर्यम् । महाभूतैरर्थात् प्राकृतिकैः तत्त्वैः निर्मितेऽस्मिन् संसारे समेषां समसमानः सहभागः परस्पराश्रयश्च नूनम् अन्योन्यसहायकः । अतो "माता पृथिवी पुत्रोऽहं पृथिव्याः", "समाना व आकूति", "दशपुत्रसमो द्रुमः" इत्येतानि वाक्यानि मुहुः स्मारयन्ति अस्मात् मनुष्यस्य प्रकृतेश्च परस्परावलम्बन् । तस्माद् प्रकृतेर्यथा ह्रासः, हानिः, कष्टं वा न भवेत् तथेदं जगत् अस्मद्प्राचैः सन्तुलनं विधाय रक्षितं संवर्धितञ्च आसीत् । तदर्थमेव ईदृशानि ऐहिकविषयकप्रतिपादकानि नररचना वास्तु इत्यादीनि शास्त्राणि रचितान्यासन् । परं साम्प्रतमस्य महत्त्वं प्रासङ्गिकता च न केनापि लक्षीक्रियते । स्वार्थपरः मनुजः प्रकृतेर्नाशाय प्रवृत्तः यथाकथञ्चिद् विकासं साधयितुकामः वर्तते । यद्यत्र प्राचां वचः प्रामाण्येन स्वीकृत्य शास्त्राधारितानि मतानि समादृत्य नगररचनादिकं प्रवर्तते चेद् भाविनिकाले नूनं प्रकृतेः रक्षणं कुर्वन्तः अन्योन्यविकासं साधयितुं प्रभवेम इति ।

## सन्दर्भसूची

१) मत्स्यपुराणे २५२/२-३-४
२) ऋग्वेदे ४/३८/१
३) ऋग्वेदे १/३३/१५
४) ऋग्वेदे २/४१/५

५) ऋग्वेदे ८/४७/१०
६) अथर्ववेदे १९/५८/४
७) ऋग्वेदे १०/१४२/८
८) अथर्ववेदे ३/१२
९) अग्निपुराणे १०६/१-५
१०) भविष्योत्तरपुराणे २३/१२
११) गरुडपुराणे ४६/१-५
१२) वाल्मीकियरामायणे २/४/२०-२३
१३) समराङ्गणसूत्रधारे १८/१-२
१४) समराङ्गणसूत्रधारे १०/१
१५) समराङ्गणसूत्रधारे १०/२-३
१६) मयमते १०/५२-५३
१७) मयमते ९/४१-४२
१८) मयमते ९/४६
१९) मयमते ९/४३-४४-४५

## सन्दर्भग्रन्थसूची


१) "ऋग्वेदः" श्रीमत्सायणाचार्यविरचितभाष्यसमेता तिलक-महाराष्ट्र-विद्यापीठ-वैदिक संशोधन-मण्डलः, पुणे ।
२) "अथर्ववेदः" परोपकारिणी-सभा, अजमेरम् नगर-वैदिक-यन्त्रालयः।
३) "वाल्मीकिरामायणम्" - गीताप्रेस, गोरखपुरम् ।
४) "अग्निपुराणम्" - गीताप्रेस, गोरखपुरम् ।
५) "गरूडपुराणम्" - गीताप्रेस, गोरखपुरम् ।
६) "मयमतम्" - चौखम्बा कृष्णदास-अकादमी, वाराणसी ।
७) "समराङ्गणसूत्रधारः" - चौखम्बा संस्कृत सीरीज आफिस, वाराणसी ।
८) "शिल्पशास्त्रम्" – चौखम्बा-संस्कृत-सीरीज-आफिस, वाराणसी ।
९) "Town Planning in Ancient India" - Binod Behari Dutt – Vishal Kaushik Printers


***